MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - I, No. 1: 2021

# कोरोनासंक्रमणनिराकरणे संस्कृतवाङ्मये उपादानानि

**लक्ष्मीकान्तषडङ्गी**

**प्रबन्धसारः**

*"शरीरमाद्यं खलु धर्मसाधनम्" इत्युक्त्यनुसारं न केवलमात्रं धर्मसाधनायापि तु धर्मार्थकाममोक्षाणामपि साधनायेदं शरीरमेवैकमलमिति नास्ति कस्यचिदपि विमतिः।परन्तु सर्वदा सर्वथा न तथा जनानां निरामयजीवनं सुलभमेव दरीदृश्यतेऽस्मिन् संसारे। यतो हि सम्प्रति एकविंशशताब्द्याः पाददेशे चिकित्साविज्ञानस्य बहुलाग्रगत्यापि कोरोनाभूताणुकवलिताः विश्ववासिनः। यदा जनाः अदृष्टेश्वरस्यास्तित्वं प्राचीनवेदविद्यादिकञ्च विस्मर्यात्मानमीश्वरमिति मन्यन्ते तदा तु कोरोना इत्यदृष्टभूताणुः जनान् मूढ इति प्रतिपाद्यादृष्टेश्वरस्य महत्त्वं पुनः स्मारयति। भूताणुरयं भिन्नभिन्नरूपेण स्वकायां विस्तार्य प्रत्यहं विश्वस्य लक्षलक्षसंख्यकान् जनान् संक्रम्य च नाशयति। अत्याश्चर्यस्य विषयोऽयं यदनेन निर्जीवादृष्टकोरोनाभूताणुभयेन भीताः जनाः सम्प्रति निरूपायाः सन्तः गृहाभ्यन्तरे आत्मानं गोपयन्ति। अतः संशयपूर्णपरिस्थितावस्यामुच्यते तावत् व्यासवाल्मीकिचरकसुश्रुतादिभिः प्रणीतं वेदोपनिषदायुर्वेदपुराणादिप्राचीनसंस्कृतशास्त्रसमग्रमस्माकं लोचनस्वरूपमस्ति। येषामवलोकनेनानुशीलनेन चास्माकं समाधानमवश्यमेव सम्भवेदिति नास्त्यत्र संशयस्यावकाशः। उच्यते च यथार्थेण--*

*"समस्यायाः निवारणं समस्यायाः श्रमस्य सुफलं तथा।*
*भवतु कालदीर्घेण लभते नात्र संशयः॥" इति*

## उपक्रमः

"सुखं वाञ्छति सर्वो हि तच्च धर्मसमुद्भवम्"[1] इत्युक्त्यनुसारं जगतीह सर्वेऽपि जनाः सदैव सुखं निरामयञ्च जीवनं कामयन्ति। परन्तु अस्य सुखस्य निरामयजीवनस्य च मूलमेव धर्मः। अस्य धर्मस्यापि मूलमेव सुस्थशरीरमस्ति। "धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः"[2]। यतो हि सुस्थशरीरं प्राणान् वा विना न कोऽपि जनः स्वधर्मं सम्यग्रूपेण पालयितुं क्षमः। यथार्थेण अस्मादुच्यते "शरीरमाद्यं खलु धर्मसाधनम्"[3] इति। अतः सर्वेषां धर्माणां साधनस्वरूपं शरीरं सर्वैः सर्वदा सर्वादौ सयत्नेन संरक्षणीयम्। परन्तु सुस्थशरीरेण जीवनं नैव तथा सुलभम्। यतोहि उच्यते शरीरं व्याधिमन्दिरम्। यतः मनुष्यशरीरात् एका व्याधिः समाहिता चेदपरा समायाति। एवं क्रमेण व्याधिपरम्परा प्रत्येकेषु जनेषु प्रचलति प्रतिदिनं प्रतिमुहूर्त्तम्। निरवच्छिन्नं व्याधिरहितं जीवनं न लक्ष्यते कदापि कदाचित् कस्यापि जीवने। तथापि जनाः जिजीविषन्ति, व्याधिनिराकरणे यथासाध्यं सचेष्टा भवन्ति। इयमेव धारा प्रचलतितरां सर्वत्र सर्वदैव। व्याधयः सन्ति दरिद्राणां तथा धनिनामपि। नास्ति संसारेऽस्मिन् आमयविहीनः एकोऽपि जनः।

## करोना-समस्या

सर्वे वयं जानीमः, सम्प्रति समग्रविश्वस्य कृते या मुख्या समस्या सैव समस्या करोना-समस्या नाम्नाभिहितास्ति। या समस्या विश्वस्वास्थ्यसंगठनेनापि (W.H.O.द्वारा) **सर्वव्यापी महामारी** इति नाम्ना समुद्घोषिता भवति। भूताणुद्वारैव संक्रमितेयं व्याधि **:कोभिड्१९-** इति नाम्ना समग्रेऽस्मिन् विश्वे परिचिताऽस्ति। निकटे अतीते २०१९ ख्रीष्टाब्दे नभेम्बरमासे **चीन्-**देशस्य उहान् इति नगरीतः आरभ्य एकैकेन क्रमेण संक्रम्य च सम्प्रति विश्वस्य द्विशताधिकं देशं परिव्याप्य प्रतिदिनं लक्षलक्षसंख्यकान् जनान् घातयतीयं कोरोना व्याधिः। गवेषकाणां चिकित्सकानाञ्च मतानुसारं यद्यपि भूताणुजनितेयं व्याधिः आसीदतीते, आयाति वर्तमाने स्थास्यति च भविष्ये समये तथापि साम्प्रतिके काले कोरोनाभूताणोः **कोभिद्१९-** इति श्रेण्याः भयावहता समग्रेऽस्मिन् विश्वे दरीदृश्यते प्रतिनियतम्। कोरोनाभूताणुरयं चक्षुर्नासिकादीनां संस्पर्शेण मानवशरीरं सम्प्रविश्य मनुष्यस्य रोगप्रतिरोधकशक्तिं विनश्य श्वासजनितसमस्यादिकं च सम्भूय अतिसत्त्वरमेव मनुष्यं मृत्युमुखं प्रेषयति। अत्याश्चर्यस्य विषयोऽयं यत् निर्जीवोऽपि भूताणुरयं सजीवशरीरं संक्रमणेन तत्रापि स्वकायां विस्तार्य क्रमशः सजीवशरीरमपि निर्जीवं कारयति। न केवलमात्रमेतत् संक्रमणं मानवशरीरस्य कृतेऽस्ति, अपितु समग्रजीवजगत् अप्ययं भूताणुः सम्प्रति संक्रमति। पुनश्च न केवलमात्रं जीवजगतः संस्पर्शादिवास्यैव भूताणोः संक्रमणभयम्, अपित्वस्माकं दैनन्दिनजीवनस्य नित्यव्य-वहार्यवस्तुमाध्यमेनाऽपि भूताणुरयं सततमेव संक्रमति। परिणामवशतः सम्प्रति न केवलमात्रं जनानां जीवनहानिः जायते, अपितु समग्रेऽस्मिन् विश्वे सर्वकाराणां विधिनिषेधादिभिः व्यवस्थापनाभिः समग्रं जनजीवनमपि विपर्यस्तं भवति। यतो हि जनजीवनेन साकं कोरोना कवलिता सती शनैः शनैरनुदिनं क्षीणा भवत्यस्माकं देशस्य समग्रविश्वस्य च अर्थनीतिव्यवस्था। विविधानां देशानां पक्षतः सर्वकारीयस्तरेषु विहितैः विविधैः पदक्षेपैरपि कोरोनाभूताणोः संक्रमणं सम्प्रति न यात्यन्तं प्रत्युत प्रतिदिनं प्रचलत्येव निरवच्छिन्नम्।

## करोनानिराकरणोपायः

यद्यपि करोनायाः समूलोत्पाटनं नैव सुकरं, यतो हि अन्यान्यमहामारी- णामिव इयमपि सुचिरं दिनं स्थास्यतीति समीक्षकाणां सुदृढं मतमस्ति, तर्हि अस्यामेव परिस्थितौ कथमस्माभिः करोनाया निराकरणेन निरापदेन च स्थातव्यं, साम्प्रतिकपरिस्थितौ अस्माकं किं कर्त्तव्यं का वा गतिः, कथं समस्येयं दूरीभूता भविष्यति इत्ययं विषयः सम्प्रति विश्वस्य कृते प्रमुखरूपेण चिन्तनीयः प्रसङ्गोऽस्ति। अस्यां संशयपूर्णपरिस्थितौ उच्यते तावत् व्यास-वाल्मीकि-मनु-चरक-सुश्रुतादिभिः प्रणीतं वेदोपनिषदायुर्वेदपुराणादिप्राचीनसंस्कृतशास्त्रसमग्रम् अस्माकं

[1] दक्षस्मृतिः - १.१८, पृ. ३२५
[2] हितोपदेशः - १.२३, पृ.६०
[3] उपनिषद् परिचयः – पृ.३३

ISSN : 2583-2271
Vol. - I, No. 1: 2021

लोचनस्वरूपमस्ति। येषामवलोकनेन अनुशीलनेन चास्माकं संशयस्य छेदः समस्यायाश्च समाधानमवश्यमेव सम्भवेदिति नास्त्यत्र संशयस्यावकाशः। यथार्थेनोच्यते नीतिशास्त्रे –

"अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।

सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥"[4]

वास्तवदृष्ट्या शास्त्रविहितं मार्गं सर्वकारविहितं सुपदक्षेपञ्च यदि वयं सचेतनाः सन्तः सम्यग्रूपेण पालयिष्यामः तर्हि अचिरेणैव विपदः अस्या मुक्ताः भविष्यामः। एतदर्थम् उच्यते –

"निवारणं समस्यायाः श्रमस्य सुफलं तथा।

भवतु कालदीर्घेण लभते नात्र संशयः ॥"[5]

अर्थात् समस्यास्याः समाधानं परिश्रमस्य सुफलञ्च विलम्बेनापि प्राप्यते नात्र संशयोऽस्ति।

## संस्कृतवाङ्मये करोनानिराकरणोपादानानि

प्राचीनसंस्कृतशास्त्रेषु विविध- संक्रमणात् विमुक्तये आहार-विहार-व्यवहार-निद्रा-स्नान-शौचादिष्वखिलकर्मसु कीदृशः साधारणनियमः पालनीयः तदालोच्यते। मनुष्याणां कृते निरामयजीवनयापनाय करोनादीनां महामारीणां संक्रमणनिराकरणाय च सर्वास्वेवावस्थासु शुचित्वमपरिहार्यम्। इदमेव शुचित्वं द्विविधम्। अन्तर्बाह्यश्चाथवा अन्तरिन्द्रियगतत्वं बहिरिन्द्रियगतत्वञ्च। अन्तरिन्द्रियस्य अन्तःकरणस्य वा शुचित्वं सच्चिन्तासत्कर्मसज्ज्ञानसदाचारणादिभिः च सिध्यति। अनेन शरीरे रोगप्रतिषेधकशक्तेः वृद्धिर्घटते। अतः शरीरं सहसैव रोगाक्रान्तं नैव भवेत्। अतः सर्वादौ एवान्तःकरणस्य शुचित्वमवश्यमेव आवश्यकम्। ततः बहिरिन्द्रियाणां शुद्धत्वं स्नानादिभिः क्रियते। उच्यते विषयेऽस्मिन् "स्नानेन शुद्धिः न तु चन्दनेन"[6] इति। एवमपि वाधूलस्मृतौ उच्यते यथा "स्नानाचारविहीनस्य सर्वाः स्युः निष्फला क्रियाः"[7] इति। अर्थात् विना स्नानेन न किञ्चिदपि कार्यं सिध्यति। यतो हि स्नानादिभिः बहिरिन्द्रियाणां शुचित्वे जाते मनसः शरीरस्य चोभयोः पवित्रता प्रसन्नता निर्मलता च विराजन्ते। अनेन शरीरस्य मनसश्च प्रसन्नतायां मानवशरीरे सहसैव व्याधिसंक्रमणं नैव जायते। अतः सर्वाण्येव कार्याणि स्नानादिभिः शुद्धाचारेण सह सम्पादनीयम्। मुख-चक्षुः-कर्ण-नासिकादीनां मार्गैः शरीरे जीवाणुसंक्रमणं भवेत्। एतदर्थं मुखनासिकादीन् मुखावरणैः शुद्धवस्त्रादिभिः आच्छाद्य मौनत्वमवलम्ब्य शौचादिकं कार्यं करणीयम्। पुनश्च यथासम्भवमपरिष्कृत-परिवेशात् दूरे स्थातव्यम्। स्वशरीरस्य शुचित्वेन सह पर्यावरणस्यापि शुचित्वं संरक्षणीयं सततम्। अन्यथा अपरिष्कृतपर्यावरणादपि विविधानां संक्रामकरोगाणां संक्रमणं मानवशरीरे सम्भवेत्। एतदर्थमुच्यते शास्त्रे "घ्राणास्येवाससाच्छाद्य मलमूत्रं त्यजेत् बुधः"[8]।

मनुसंहितायामप्युच्यते "नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः"[9]। खाद्यग्रहणादि-समयेष्वपि हस्त-मुख-नखादीनां मलमाध्यमेन शरीरे जीवाणूनां प्रवेशः जायते। एतदर्थं हस्तपदमुखनखादीन् परिष्कृत्य भोजनमाचरणीयम्। पद्मपुराणे एतदर्थमुच्यते "हस्तपादे मुखे चैव पञ्चार्द्रो भोजनं चरेत्"[10] इति। एवञ्च सुश्रुतसंहितायामप्युक्तमस्ति यत् "नाप्रक्षालितपाणिपादो भुञ्जीत"[11] इति। पुनश्च अशुचिस्थानगमनागमनवेलायाम् अशौचसमयेषु च सर्वेषामेव जनानां स्नानं सम्पादनीयमेव। तद्यथोच्यते विष्णुस्मृतौ- "चिताधूमसेवने सर्वे वर्णाः स्नानम् अचारेयुः। वमने श्मश्रुकर्मणि कृते च॥"[12] इति। अर्थात् श्मशानभूमिगमनात् वमनात् श्मश्रुनखकेशादीनां छेदनाच्च परं सर्वेषां स्नातव्यम्। खाद्यादीनां शुचित्वमिव वस्त्रादीनामपि शुचित्वमाचरणीयम्। अपरस्य वस्त्रं, मलिनं वस्त्रं, बहुदिनपरिधानवस्त्रञ्च न परिधातव्यं कदापि। अतः वस्त्रादिभिः शुचित्वसम्पादनाय पद्मपुराणे प्रतिपादित- मस्ति यत् "न धारयेत् परस्यैवं स्नानवस्त्रं कदाचन"[13] इति। विशेषतः अपरस्य जनस्य स्नातवस्त्रं कदापि कस्यापि न परिधातव्यम्। एवं आचरणेन अपरजनस्य शरीरस्य जीवाणुसंक्रमणभयं स्वकीये शरीरे सञ्जायते। पुनरपि कदा कस्मिन् कर्मणि च कीदृशं वस्त्रं व्यवहर्तव्यमित्यस्मिन् विषयेऽपि निर्देशः विद्यते, तद्यथा-

"अन्यदेव भवेद् वासः शयनीये नरोत्तम।

अन्यद् रथ्यासु देवानामर्चयामन्यदेव हि॥"[14]

अर्थात् शयनसमये गमनागमनसमये देवार्चनसमये च मनुष्याणां पृथक् पृथक् वस्त्राणि व्यवहर्त्तव्यानि। प्रतिदिनं वस्त्राणि जलेन परिष्कृत्य प्रक्षाल्य च व्यवहर्तव्यानि। एतदर्थमुच्यते विष्णुस्मृतौ "न अप्रक्षालितं पूर्वधृतं वसनं बिभृयात्"[15] इति।

विविधेभ्य: संक्रमणेभ्य: रक्षार्थं खाद्यवस्त्रादीनां शुचित्वमिव जलाहरणेऽपि सतर्कतावलम्बनीया। वस्त्रपूतं सुपरिष्कृतं पानीयञ्च जलमञ्जलिना न गृहीत्वा स्वच्छपात्रेणैव पिबेत्। एतदर्थमुच्यते मनुना "न वार्यञ्जलिना पिबेत्"[16] इति। एवञ्च - "नाञ्जलिपुटेनापः पिबेत्"[17] इति सुश्रुतसंहितायामुक्तमस्ति। न केवलमात्रं जलपानसमये सतर्कता विधेया अपितु लवण-घृततैल-व्यञ्जन-पानीयादीनां ग्रहणं कदापि साक्षादेव हस्तेन न कर्त्तव्यम्। एतदर्थं परिष्कृतपात्रं व्यवहर्त्तव्यम्। धर्मसिन्धु इति ग्रन्थे प्रसङ्गेऽस्मिन् उच्यते यथा –

"लवणं व्यञ्जनं चैव घृतं तैलं तथैव च।

लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत्॥"[18]

---

[4] हितोपदेशः – १. पृ.५८

[5] आयुर्वेदस्येतिहासः – पृ.५

[6] चाणक्यनीतिः - १७-१२, पृ.७

[7] वाधूलस्मृतिः - पृ.१०६

[8] वाधूलस्मृतिः - ९. पृ.१०७

[9] मनुसंहिता – ४.४९, पृ.२०३

[10] पद्मपुराणम् (यज्ञपुराण) सृष्टि – ५१.८८, पृ.३०६

[11] सुश्रुतसंहिता – चिकित्सा – २४/९८

[12] विष्णुस्मृतिः - २२

[13] पद्मपुराणम्-सृष्टि. – ५१.८६

[14] महाभारतम्-अनु. - २०४.८६

[15] विष्णुस्मृतिः – ६४

[16] मनुसंहिता – ४/६३

[17] सुश्रुतसंहिता – पृ.२५९

[18] धर्मसिन्धुः - ३. पू.आह्निकम्

कोरोनासंक्रमणस्यान्यतमं प्रमुखकारणं भवति हस्तादिभि: मुख-नासिका-नेत्र-कर्णादीनां वारंवारं स्पर्शकरणम्। एवं करणेन हस्तस्थिताः जीवाणुसमूहाः शरीरमध्यं संप्रविशन्ति। एतदर्थमपि शरीरे रोगसंक्रमणं सम्भवति। अत: कोरोनासंक्रमणात् रक्षार्थं विना कारणेन मुखादीन् न स्पृशेत्। एतदर्थमुच्यते "अनातुरः स्वानि खानि न स्पृशेदनिमित्तत:"[19] इति। एतदतिरिच्य स्नानादनन्तरमावस्त्रेण शरीरं नापमृज्यात्। एवं कृते सति चर्मणः संक्रमणमपि सम्भवेत्। उच्यते यथा "अपमृज्यान्न च स्नातो गात्राण्यम्बपाणिभि:"[20] इति। अस्माभिः व्यवहरणीयं जलं सततमेव शुद्धं रक्षितव्यम्। एतदर्थं स्नानादिसमये जले शौचादिकं न कर्त्तव्यम्। एवं कृते सति जलजनितं संक्रमणं न सम्भवेत्। आपस्तम्भधर्मसूत्रे एतदर्थमुच्यते "नाप्सु मूत्रपूरीषं कुर्यात्"[21] इति।

## निष्कर्षः

समाजस्य सर्वाङ्गीणविकासाय शिक्षाया: स्वास्थ्यस्य च विशेषरूपेण प्रयोजनमपरिहार्यम्। विशेषत: धर्मसाधनाय यथैव सुस्थशरीरस्य आवश्यकता तथैव सुस्थशरीरायापि सुशिक्षाया: सचेतनतायाः चापि नितराम् आवश्यकता अस्ति। कोरोनाया: इव नैका महामारी अतीते आगता सम्प्रति आगच्छति भविष्ये चागमिष्यति। परन्तु उपर्युक्तानां शास्त्रनियमानां परिपालनेन सतर्कतायाश्च चावलम्बनेन कोरोना महामारी दूरीभूता स्यात्। उक्तञ्च – "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्"[22]। अत: अस्माकमाहार-विहार-निद्रासु समता संसाधनीया। अस्माकं दिनचर्यायां जीवनशैल्याञ्च समता संरक्षणीया। अनेनास्माकं मानसिकशारीरिका-ध्यात्मिकशक्तेः विकासः भवेत्। एवमस्माकं शक्तौ विकाशितायां सत्यां व्याधिसंक्रमणभयं न जायते। व्याधिग्रस्तोऽपि मानव: मानसिकशक्त्या यदि सुदृढः स्यात् तर्हि तस्य पीडा क्षीणा स्यात्। उच्यते च "आधिस्तु मानसो व्याधि:"[23]। शारीरिकशक्तिबृद्ध्या शरीरे रोगप्रतिषेधकशक्तेः प्रभावेण सहसैव मनुष्यशरीरं व्याधिग्रस्तं नैव भवेत्। एवञ्चाध्यात्मिकशक्तियुक्तोऽपि मानव: नाचिरेण व्याधिग्रस्तः भवेत्। एतदतिरिच्य सामाजिकदूरत्वमुखावरणधारणादिसर्वकारविहित**म्** अनुशासनं सतर्केण सह सततम् अस्माकं पालनीयम्। कायमनोवाक्यैः स्वच्छता अवलम्बनीया। साम्प्रतिके काले भारतसर्वकारप्रचलितं **स्वच्छता-मिशन** इत्यायोगस्योद्देश्यम् अस्माभिः सर्वैः सान्तरिकं सश्रद्धं च सफलं कर्त्तव्यम्। परिवेशसंरक्षणेन सह प्रदूषणमुक्तं पर्यावरणं कर्त्तव्यम्। उच्यते – **यत्र यत्रैव स्वच्छता तत्र तत्रैवेश्वरस्य वासः।** अत: यदि सर्वत्रैवेश्वरस्य वास: सम्भवेत् तर्हि नैव कदापि कोरोनासंक्रमणभयं स्यादपितु स्यात् केवलं देवानामिव मानवानामपि सुखं निरामयममृतञ्च जीवनम्। यतोहि "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर:"[24]।

यथार्थेणोच्यते प्राचीनमनीषिभिः "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः"[25]। इति शम्।

### सहायकग्रन्थसूची


- आयुर्वेदस्येतिहासः, धर्मग्रन्थष्टोर, कटक, ओडिशा, १९९५
- आपस्तम्भधर्मसूत्रम्, चौखम्बाप्रकाशनम्, वनारस, उत्तरप्रदेशः।
- उपनिषद् परिचयः, किताबमहल, ओडिशा, २००२
- गरुडपुराणम्, धर्मग्रन्थष्टोर, कटक, ओडिशा – १९८५
- चाणक्यनीति:, कोलकाता बुक् डिपो, कोलकाता, २००५
- दक्षस्मृतिः, कोलकाता बुक् डिपो, कोलकाता
- धर्मसिन्धुः, साम्बिदीप्रकाशनम्, पुरी, ओडिशा, २००८
- पद्मपुराणम्, धर्मग्रन्थष्टोर, कटक, ओडिशा, २००२
- मनुसंहिता, कोलकाता बुक् डिपो, कोलकाता, २००६
- महाभारतम्, चौखम्बाप्रकाशनम्, उत्तरप्रदेशः
- मार्कण्डेयपुराणम् , चौखम्बासुरभारती- प्रकाशनम्, २००३
- विष्णुस्मृतिः, किताबमहल, ओडिशा।
- वाधूलस्मृतिः, साम्बिदीप्रकाशनम्, पुरी, ओडिशा, २००५
- स्कन्धपुराणम्, चौखम्बासुरभारती-प्रकाशनम्, २००३
- सुश्रुतसंहिता, किताबमहल, कटक, ओडिशा, २००१
- हलायुधकोशः, संस्कृत बुक् डिपो, कोलकाता, २००५
- हितोपदेशः, ढाका ष्टुडेण्ट्स् लाइब्रेरी, कोलकाता, २००३


[19] मनुसंहिता – ४/१४४

[20] मार्कण्डेयपुराणम – ३४-५२ प.३२०

[21] आपस्तम्भधर्म

[22] स्कन्धपुराणम्

[23] हलायुधकोश: – पृ.७६

[24] गरुडपुराणम् – पृ.३०७

[25] पातञ्जलयोगसूत्रम् – १.२४, पृ.२३१